नं० ४८४२

नाम - कामकेश्वरतंत्रे महादेव पञ्चाङ्गम्

कर्ता - x

पत्र सं. - २८ पत्राणि सं.

विषयम् - तंत्रम्

महादेव पंचांगम्

विश्वसारोद्धारे

४८ ५१



महा॰
पं॰
१

ॐ अथ महादेवपद्धतिः ॐ श्रीभैरवः ॐ अ
थनाश्रुणुदेवेशिमहादेवस्यपद्धतिं गद्य
पद्यमयींगोप्यांसकलागमनिश्चिताम् या
तःकृत्यमकृत्वातुयोदेवींभक्तितोर्चयेत् त
स्यपूजातुविफलाशौचहीनायथाक्रिया या
तःशिरसिशुक्लाब्जेहृदिनेत्रेहृदिधुनेयुकम् वरा
भयांकुशपाशांतंस्मरेन्नामसर्वदाम् ब्राह्मेश्रा
ह्रींधायनन्तलाडन्याय करचवशीघ्रत्याम
निज्ञासनेसम्पविश्यनिजशिरसिश्वेतव
र्णपीयूषवमदूश्वदलकमलकर्णिकांत
र्गतंचंद्रमंडलसिंहासनोपविविष्टंसस्वग्र
हंशुक्लवर्णशुक्लालंकारभूषितं नानान
रधरितमानसंसाक्षिद्दानंदविग्रहं चिन्तय

ने चतुर्भुजं त्रिनेत्रानसुन्द्रा शूलकवराभयकरां
वामाङ्गे वामहस्तधृतकमलयाम्बरम्भवा
सनाभरणायाश्च पार्वत्या दक्षिणभुजेना
लिङ्गितं सर्वदेवादिदेवं सर्वतीर्थादितीर्थं
परमशिवस्वरूपं शान्तं स्वप्रसन्नं ध्यात्वा त
श्चरणकमलयुगलविगलदमन्दपारया
स्वात्मानं विभाव्य मानसोपचारैराराधये
यथा लं पृथिव्यात्मकं गन्धं समर्पयामि न
मः हं आकाशात्मकं पुष्पं समर्पयामि नम
यं वाय्वात्मकं धूपं समर्पयामि नमः रं वह्न्या
त्मकं दीपं समर्पयामि नमः वं अमृतात्म
कं नानानैवेद्यं समर्पयामि नमः सं सर्वा
त्मकं फलमूलादिकं समर्पयामि नमः त

म॰ह्रा॰ पं॰ ५

तः श्रीगुरुपादुकादेवताः स्मृत्वा प्रणामं कुर्या
त् ॐ नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपि
णम् शिरसा योगपीठस्थं मुक्तिकामार्थसिद्
ये इति गुरुं प्रणम्य स्वस्थमने विभाव्य मनसा
तदन्तां गृहीत्वा बाह्यतेपमाचे गत्वा मलमूत्रं
त्यागाचमने विधाय दन्तधावनं कुर्यात् यथा
मूले दन्तकाष्ठं प्रक्षाल्य क्लीं कामदेवाय सर्व
जनप्रियाय नमः इति दन्तधावनं विधाय जि
ह्वामुल्लिख्य दन्तकाष्ठं प्रक्षालितं ईशस्मृह दे
शे निक्षिपेत् ततो नद्यादीकं गत्वा मृदादिकं
गृहीत्वा गत्वा वैदिकस्नानं कुर्यात् तान्त्रिक
मारभेत मूलेन करचरणौ प्रक्षाल्य ॐ मणि
धरि वज्रिणि महाप्रतिसरे रक्ष २ हुं फट् स्वाहा

इतिशिखांबध्वाचमनत्रयंकुर्यात् मूले
आत्मतत्वंशोधयामिस्वाहा मूलं महादेवा
यस्वाहा मूलं कपिलजटायस्वाहा इत्याचम्य
मूलेनहस्तपादौप्रक्षाल्य ॐग्रसितायनमः
नासिकाग्रढेनसंस्पृशेत् मूलेनमलापकर्ष
णस्नानंविधाय पुनराचम्य प्राणायामत्र
यादिकरषडंगंविधाय संकल्पंकुर्याद्यथा
अद्यामुकमासे अमुकपक्षे वासरे तिथौ ।
श्रीमहादेवप्रीत्यर्थंनैत्यिकस्नानमहंकरि
ष्ये जले त्रिकोणंविलिख्य गंगेत्यादितीर्थान्या
वाह्य मूलेनस्नानंसंप्रोक्ष्य मूलेनमृत्तिका
स्नपनंविधाय मूलंपठन् हृदयकमला
न्मूलदेवंसमुत्थाप्य वामनासायापुरःक ।

मरा पं ५

3

ल्पिततीर्थं समावाह्य तत्र विधिवत्स्नात्वा ।
सकलीकृत्य मनसा संपूज्य ॐ भस्म इत्यास्त्र
देवतामावाह्य तेनांत्रिरभिषिच्य श्रवणादि
समाक्षिघ्राणानि संरुध्य त्रिर्निमज्जोन्मज्जनं न
तो मूलेन त्रिर्देवं संतर्प्य स्वहृद्यानयेत् इति
स्नानविधिः अथ संध्या पूर्ववदाचम्य प्राणा
यामादि करन्यासादिकं षडंगं विधाय पूर्वव
तीर्थमावाह्य पुनः कल्पिततीर्थं संयोज्य तेन
जलेन नखस्त्र इत्याद्यादौ मूलं ब्रैं नमः इत्यादि
नात्प्रक्षाल्य स्वशरीरं मस्तकादिपादांतं सं
प्रोक्ष्य वामहस्ते जलं निधाय दक्षहस्तेनाच्छा
द्य लं वं यं इति पंचभौतिकैर्मंत्रैः सप्तवारम
भिमंत्र्य मूलेन च त्रिरभिमंत्र्य तज्जलविन्दुभि

लत्वस्त्रुड्याममवारनात्संगृह्य येनेन स्व।
शिरोदेवारं संशोध्य तज्जले स्त्रुड्व पदिंड।
यान्नेनीत्वा देहांतःपापं प्रक्षाल्य पिंगलया
ह्यस्ववर्णेन तज्जलं विरेच्य दत्तहस्तेस्थत्वा स्व
वामभागस्यकल्पितवज्रशिलायांफडिति
प्रक्षालयेत् इत्यघमर्षणं विधाय षडंग
विन्यासं कृत्वादिसंग्रगुरुं स्मरे तत्पुरुष
य विद्महे महादेवाय धीमहि तन्नो रुद्रः प्र
चोदयात् ३ इति दत्वाथ मूलगायत्रीं जपे
त् समाप्य मूलं च यथाशक्त्या जप्त्वा गायत्र्या
देवदेवायार्घ्यत्रयं दत्वा ॐ ह्रीं गं सां गायत्र्या
लात्रयी सहिताय महादेवाय एष तेऽर्घ्यो न
मः ततः पूर्ववत्सूर्यायार्घ्यत्रयं दत्वा जले

महा. पं ४

वक्त्रे विधाय मूलमन्त्रमुच्चार्य स्वदे
वीकं देवं तर्पयेत् यथा मूले सांगं सवाह
नं सायुधं सपरिच्छदं स्वदेवीकं श्रीमहादेव
भगवंस्त्वप्नं नामिति सन्तर्प्य परिवारान्
कैकांजलिना संतर्प्य ब्रह्मादिकीटपर्यन्तं
च संतर्प्य पित्रादितर्पणं विधाय देवं सह
स्तुरयास्वहृदि समानीय शिवोऽहमिति भा
वयन्यागमेउपमागच्छेदिति संध्याविधिः
ह्रूं फट् इति द्वारं प्रक्षाल्य शिरसः पादपर्यन्त
मिति त्रिव्यापकं कुर्यात् इति मातृकान्यासः
इति न्यासं विधाय हृत्कमलकर्णिकान्तर्गं
तं देवं ध्यायेत् षट्पंचे देवेशं शामलेवो
कंबोलवं जटाकपालसन्नद्धं विभूतिच्छन्न

विघ्नहृम् संवेनीयज्ञाखुकैचंचलल्पश्रमभ्र
मांयतिम् धर्मैकृपवृषाग्रहृकैंचेनम्यानंद
तिर्भरम् कपालश्लेविभ्रांताद्विभुजंभुज
गाहूतम् ज्वालाश्रुलीपरिवृत्कंमहादेव
महंभजे इतिध्यात्वामानसोपचारैराध्य
स्ववामेत्रिकोणाहूर्ममंडलेविलिख्य रंव
ह्रिंमंडलायदघाकलात्मनेनम इति ॐ गें
गंगणपतयेनमः वामदलिताक्रमेणा:
महालक्ष्म्यैनमः सरस्वत्यैनमः गंगायैन
मः यमुनायैनमः धात्रेनमः विधात्रेनमः
नंदायनमः सुनंदायनमः प्रचंडायनमः
चंडायनमः क्षेत्रपालायनमः वेतालाय
नमः अग्निवेतालायनमः इतिसंपूज्य नत

मू.हा
प
५

5

श्रासने पुष्पं दत्वा ॐ अनंतासनाय नमः विम
लासनाय नमः पद्मासनाय नमः ॐ पृथ्वि
त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं चा
धारय मां देवि पवित्रं कुरु चासनं इति वाम
पार्श्वे गंधाक्षतयं दत्वा अपसर्पंतु ते भूता ये भू
ता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते न
श्यंतु शिवाज्ञया इति विघ्नानुत्सार्य हुं अघोरा
य फट् इति दशदिशो बध्वा भूतशुद्धिं विदध्या
त्। यथा अहं भूतशुद्धिं करिष्ये इति संकल्पं वि
धाय प्रणवेन प्राणायामत्रयं कृत्वा कुंभकमिति
मूलाधारात्कुंडलिनीमुत्थाप्य सुषुम्णावर्त्म
ना हृदयस्थं जीवात्मानमादाय ब्रह्मरंध्रंग
त्वा विभाव्य हंसः इति मंत्रेणात्र सस्तनियोजये।

जयेत् ततः पादादिजान्वन्तं पृथिवीं जान्वा
दिनाभ्यन्तं जलं नाभ्यादिहृदन्तं वह्निं हृदा
दिभ्रूमध्यान्तं वायुं भ्रूमध्यादिद्वादशान्तमा
काशं शत्येवं प्रविलाप्याकाशमहंकारे म
हत्तत्वे तं दहं प्रकृतौ तां सच्चिदानंदरूपे ब्र
ह्मणीति प्रविलाप्य स्वात्मानं ब्रह्म स्वयं विभा
व्य अहं देवो न चान्योस्मि ब्रह्मैवाहं न शो
कभाक् सच्चिदानंदरूपोहं नित्यमुक्तः स्वभा
भाववान् एवं स्वात्मानं विभाव्य स्वशरीरं वा[म]
कुक्षौ पापपुरुषं ध्यायेत् यैं ह्रूं ब्रह्मज्ञादिग
नेत्रं पापपुरुषं कज्जलसमप्रभम् ब्रह्महत्याशिर
स्कं च स्वर्णस्तेयभुजद्वयम् सुरापानहृदा
युक्तं गुरुतल्पकटिद्वयम् तत्संसर्गपदद्वं

मृत्रा
पं
९

6

हंसंमंत्रसमंत्रयानेकम् उपयामि करोमि त्वा
रक्तकमलचक्रविलोचनम् लक्ष्मीवत्संथरंह्ला
संक्रांतौ पापं विचिंतयेत् इति ध्यात्वा स्ववा
मीरं सकलपापमलिनं विचिंत्य प्राणायामस्व
र्वकं पंचभूतमंत्रैर्निष्पापं कुर्यात् स्वदादि
स्थमध्यानं वायुबीजेन षोडशवारं जपेन वा
युमार्गेण पापं संशोष्य नाभ्यादि हृदंतं येन
र्गेन साग्निमग्निबीजेन चतुःषष्टिवारं जपेन
सन्दीप्य पापं निर्दग्ध्य ज्वालादिना ध्यानं जले
वसिति वरुणबीजेन द्वात्रिंशद्वारं जपेना
राय पापभस्मना साखिलमिति भूबीजेन षो
डशवारं जपेन पादादिजानुपर्यंतं दृष्टिबीवि
चिंत्य पिंडीभूतं स्वात्मानं ध्यात्वा हंसमाका

यावीजेन सकृत्त्वा तेन चैव न्यासं प्राणा
न्यामं कारयेत् इति भूतशुद्धिः ॐ ह्रां ह्रीं शिवाय
प्राणात्मने नमः इति स्वहृदि पुष्पं दत्वा ॐ आं
ह्रीं क्रौं यं रं लं वं शं षं सं हं हंसः सोऽहं मम प्रा
णा इह प्राणाः ॥ १ ॥ मम जीव इह स्थितः मम स
र्वेन्द्रियाणि इहागत्य स्वाहा वाङ्मनश्चक्षुः पर
मे सकलीकृत्य परमीकृत्य तेषु योनीव
दर्शे ह्रलं भगवं स्वालामुखी तद्धिराजीक
न्हा देवि हं स्वलिं ह्रामलेनमः ह्रां सलं
भवनं पंवं या यं रह्रां ता नमः खं रं ह्रां ता
वी वह गं यं रह्रां ता नमः उं वं रह्रां ता खा
यह सवीं गेडुं गं गो हवं नमः वह्रां यलं क
रलं नमः ह्रयं रह्रां ता नमः दीपं रह्रां ता

नमः भगवत्यै ज्वालायै शुंभहंत्रे भूतनिर्मो
च सायां नैवेद्यं प्रदापयेत् स्यात् मूलेनाऽस्त
भुसंयंसरवीहूयांन्देनापवलरणामसिद्धाह्दे
नितलंद ािहाशिनानि २९ मूसंवाम
नस्यतः श्रोत्रजिह्वाघ्राणप्राणा इहैवागत्यवि
हेसुखं चिरं तिष्ठन्तु स्वाहेति प्राणान्स्थापयेत् मू
लेन वकाये हृदि लिखितानत ज्वालामुखीस
हितं श्रीमहादेवं संपूज्य भावयेदहमिति हृदा
देनोपचारैस्तथा मंत्रसंकल्पं जपेत् अस्य
श्रीमहादेवमंत्रस्य भैरवऋषिः अनुष्टु
प्छंदः श्रीज्वालामुखीश्वरी महादेवो देवता
ह्रीं बीजं ह्रैं शक्तिः ॐ कीलकं धर्मार्थकाम
मोक्षार्थे पूजायां विनियोगः अथ न्यासः श्री

भैरवऋषयेनमः शिरसि अनुष्टुप्छंदसे
नमो मुखे श्रीज्वालामुखीश्वरीमहादेव्यै दे
वतायैनमो हृदि ह्रां बीजाय नमो नाभौ ह्रीं
शक्तयेनमो गुह्ये सः कीलकाय नमः पाद
योः धर्मार्थकाममोक्षार्थे पूजने विनियोगः
सर्वांगेषु अथ करन्यासः ह्रां अंगुष्ठाभ्यां न
मः ह्रीं तर्जनीभ्यां नमः ह्रूं मध्यमाभ्यां नमः
ह्रैं अनामिकाभ्यां नमः ह्रौं कनिष्ठकाभ्यां न
मः ह्रः करतलकरपृष्ठाभ्यां नमः अथ षडं
गः ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहा ह्रूं
शिखायै वषट् ह्रैं कवचाय हुं ह्रौं नेत्राभ्यां वौ
षट् ह्रः अस्त्राय फट् अथ मातृकान्यासः अं
नमः शिरसि आं नमो मुखे इं नमो दक्षनेत्रे

म॰ह्ना॰
पं
८

ईं नमो वामे उं नमो दक्षकर्णे ऊं नमो वामे ऋं
नमो दक्षनासापुटे ॠं नमो वामे लृं नमो द
क्षगंडे ॡं नमो वामे एं नम ऊर्ध्वोष्ठे ऐं नमोऽधरे
ओं नम ऊर्ध्वदंतपंक्तौ औं नमोऽधोदंतपंक्तौ ।
अं नमः शिरसि अः नमो मुखवृत्ते कं नमो द।
क्षबाहुमूले खं नमः कूर्परे गं नमो मणिबं
धे घं नमोऽङ्गुलिमूले ङं नमोऽङ्गुल्यग्रे चं
नमो वामबाहुमूले छं नमः कूर्परे जं नमो मणि
बंधे झं नमोऽङ्गुलिमूले ञं नमोऽङ्गुल्यग्रे
टं नमो दक्षपादमूले ठं नमो जानुनि डं नमो
गुल्फे ढं नमोऽङ्गुलिमूले णं नमोऽङ्गुल्य
ग्रे तं नमो रक्षपादमूले थं नमो जानुनि दं
नमो गुल्फे धं नमोऽङ्गुलिमूले नं नमोऽङ्गुल्यग्रे

ऐं नमो दक्षपार्श्वे फं नमो वामे बं नमः पृष्ठे
भं नमो नाभौ मं नमो जठरे यं नमो हृदि रं
नमो दक्षांसे लं नमः ककुदि वं नमो वामां
से शं नमो हृदयादिदक्षहस्तांगुल्यंते षं नमो
हृदयादिवामहस्तांगुल्यंते सं नमो हृदयादिदक्ष
पादांगुल्यंते हं नमो हृदयादिवामपादांगुल्यंते
ळं नमः पादादिपायुपर्यंतं क्षं नमः इति संपु
ज्य प्रतिलोमलिपिं विन्यस्य पदीनवतिथायतद्रुपरि
षां रवें संस्थाप्य षां रवें अग्निमंडलाय द्वादश
कलात्मने नमः इति संपूज्य तीर्थजलेनापूर्य
सौः सोममंडलाय षोडशकलात्मने नमः इ
ति संपूज्य मूलेन संधाय तत्र द्वौं कलिस्य च्छौं
शं गां गीं गंगे च यमुने चैव गोदावरि सरस्व

शिरसः पादपर्यन्तं न्यसेत् इति मातृकान्यासः इति न्यासं विधाय हृत्कमलकर्णिकायां नंदेवं ध्यायेत्
चतुर्भुजं देवेशं सोमलेखांकशेखरम् जटाकपालसन्नद्धं बिभ्रं त्रिनेत्रं विग्रहम् संवीतां चन्द्रकोटिसमप्रभ
प्रभम् पापविनाशनम् धर्मवृषवृषारूढं वैन्यपानं निर्भरम् कृपालम्बुले विश्रालं त्रिभुजं भुजगावृतम् व्याला
मालोपरि मुक्तं महादेवमहं भजे इति ध्यात्वा मानसोपचारैरभ्यर्च्य स्ववामे त्रिकोणवृत्तमंडलं विलिख्य र
द्विमंडलाय दशकलात्मने नमः

महा
प
९

ति नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्निधिं कुरु
इति सूर्यमंडलादंकुशमुद्रयातीर्थान्यावा
ह्य मूलेन श्रीमहादेवाय नमः इत्यर्घ्यं वीक्ष
योनिमत्स्यधेनुमुद्राप्रदर्शयामेत् दर्भे
नेनापि धांत्वस्यां किंतु नः स्यधौते न च विलये
योत्तिपापानि हि मवज्रास्त्र रोदये इति सा
मान्यार्घ्यं विधाय तत्तयार्घ्यं कुर्यात् सामान्या
र्घ्यस्य दक्षिणे त्रिकोणं वृत्तं चतुरस्रं विलिख्य सा
मान्यार्घ्योदकेनाभ्युक्ष्य ॐ ह्रां हृदयाय नमः
पूर्वे ॐ ह्रीं शिरसे स्वाहा दक्षिणे ॐ ह्रूं शिखा
यै वौषट् पश्चिमे ॐ ह्रैं कवचाय हुं उत्तरे ॐ ह्रौं
नेत्राभ्यां वौषट् मध्ये ॐ ह्रः अस्त्राय फट् ऊर्ध्वे
इति संपूज्य ॐ इतीशाने ह्रां इत्याग्नेये ह्रीं इम

ये इति अर्घ्यं संसृज्य तालिनाधारे संस्थाप्य
रे वह्निमंडलाय दशकलात्मने नम इत्यर्घ्य
र्घ्ये नत्र सौवर्णं राजतं वापि ताम्रं वा मृण्मयं च
रम् स्थापयेत्तु विंतदिव्यमाल्यैकंजमचवि
नम् इति संस्थाप्यदंसः सूर्यमंडलाय द्वादश
कलात्मने नमः इति संपूज्य तीर्थोदकेन स
च्छजलेनापूर्य नत्वा नामरूपाराधानेन
संपूर्य सौः सोममंडलाय षोडशकलात्म
ने नम इति सोममंडलादमृतीकरणामुद्र
यामृतेन ध्यात्वा नतर्श्नीयज्ञेभेनिक्षिप्य
ये ग्रो इत्यादितान्त्रमुद्रार्ये अमृते अमृता
नोद्भवे अमृतनाकर्षिणि अमृतवर्षिणि अ
यादेवि परमानंदेश्वरि स्वाहेति दर्शयाज्ञा।

महा. पेत् गंगादितीर्थान्यावाहयेत्तत्र योनिमत्स्य
पं. मुद्राः प्रदर्श्य अमृतीकृत्य मूलं दशधा प्रज
९. प्य गंधाक्षतपुष्पैः संपूज्य महास्तमयं ती
10 र्थं ध्यायेदिति चतुरस्थापनम् चतुरस्रे त्रिकोणं
विलिख्य साधारं पात्रं संस्थाप्य चतुरस्रमेना
मूर्यं ग्रंतमशक्तिलोतं मातृकामंत्रं संमूलमू
लं तदुपरि जलादि आवर्तं भावयेदिति पर
मपात्रे परमपात्रांते गुरुपात्रा चमनीयम
धुपर्कपात्राणि संस्थाप्य गुरुपात्रे तीर्थं
स्तंपाद्याचमनीयपात्रात् लं मधुपर्कपा
त्रे घृतमधुसितादि निक्षिपेत् ततः मुद्राः
ख्यानि परमामृतेनाभ्युक्ष्य पंचपात्रेष्वमृती
करणमुद्राः प्रदर्श्य श्रीचक्रे रत्नपीठाया

रेफरिध्यात्वा बिन्दुविराजमानत्रिकोणमं
डितषडस्रांचितवृत्तभूषितवसुदलखचित
वृत्तत्रयविलसितधरणीसमाश्रयेश्रीचक्रे
विलिख्यसंस्थाप्यवाग्रेंग्रांक्ष्मादितत्त्वानस्था
येशिवशक्तिसदाशिवेश्वरशुद्धविद्यामाया
कलाविद्यारागकालनियति पुरुषप्रकृ
त्यहंकारमनोबुद्धित्वक्चक्षुःश्रोत्रजिह्वाघ्रा
णवाक्पाणिपादपायूपस्था शब्दस्पर्शरूपर
सगन्धाकाशवायुवह्निसलिलपृथिव्यात्मषट्त्रिं
शत्तत्त्वस्वरूपायश्रीयोगपीठायनमइति
पीठंसंपूज्य मनसापाद्याचमनीयमधुप
र्काद्यानन्तपुष्पधूपदीपादिभिःसंपूज्य भ
गवन्तंसर्वलोकेशमहादेवमहेश्वर ध्याये।

न्यासं च आवाहनादिमुद्राः प्रदर्श्य सकलीकृत्य परमीकृत्य ध्यात्वा योनीमुद्रां प्रदर्श्य मूलं भगवन्नाराय
रवीं हिम महादेव इदं रत्नसिंहासनं नमः इहास्तां भवता पाद्यं इदं पाद्यं नमः अर्घ्यं इहायम्बो
गन्धं इहायन्नमः अर्घ्यं इहाचमनीयं मधुपर्कं इहाय नमः पुष्पं इहायवे सर्वाङ्गे पुष्पोदकं नमः
वस्त्राद्यलङ्कारं धूपं दीपं आत्मनः पुरस्तात् चतुरस्रं कृत्वा भूमौ निधाय तत्र नैवेद्यपात्रं संस्थाप्य मू
लेनाभ्युक्ष्य मुद्रया अमृतीकृत्य अमृतोपस्तरणमसि स्वाहा इति जलं दत्वा

महा
प
११

त्वामर्चयिष्यामि तावदेव इहावह ॥ इति श्रीविं
दुस्थितेन मुद्रां दत्वा प्राणान् प्रतिष्ठां कुर्यात् ॐ आं
ह्रीं क्रौं यं रं लं वं शं षं सं हं हंसः सोहं श्रीमहादेवा
स्य प्राणा इह प्राणाः ॥ ॐ जीव इह स्थितः ॥ एवं स
र्वेन्द्रियाणीह स्थितानि एवं वाङ्मनश्चक्षुः श्रोत्र
घ्राणप्राणा इहागत्य सुखेन चिरं तिष्ठन्तु स्वाहा
इति प्राणान्न्यास मुद्राः प्रदर्श्य ॐ अमृतापिधा
नमसि स्वाहा ॥ इदमाचमनीयं स्वधा मूलान्ते
तो मूलेन नमः ॥ ततः परिवारदेवताः पूजयेत्
तत्रादौ चतुरस्रे पूर्वादितः ॐ ह्रां ह्रौं इन्द्रश्रीपा
दुकां पूजयामि तर्पयामि नमः ॥ इति मुद्रया
संपूज्य सामान्यार्घोदकेन सन्तर्प्य च ॥ एवम
ग्निश्रीपादुकां ॥ यमश्रीपा० ॥ नैऋतश्रीपादु० ॥

वरुणश्रीपा॰ कुबेरश्री॰ ईशानश्री॰ ब्रह्मश्री
पा॰ अनन्तश्री॰ इतिप्रथमावरणम् ततोन्त
र्मध्येवायव्यादितः ॐ ह्रां ह्रीं दिव्यौघगुरुश्रीपा
दुकांपूजयामितर्पयामिनमः ऐं सिद्धौघगु
रुश्रीपा॰ ऐं मानवौघगुरुश्रीपा॰ इतिद्विती
यावरणम् २ ततोष्टदलेदक्षिणावर्तक्र
मेण ॐ ह्रां ह्रीं असितांगभैरवश्रीपादुकां
पूजयामितर्पयामिनमः ऐं रुरुभैरवश्री
पा॰ ऐं चंडभैरवश्रीपा॰ ऐं क्रोधभैरवश्रीपा॰
ऐं उन्मत्तभैरवश्री॰ ऐं कपालेशभैरवश्री॰
ऐं भीषणभैरवश्री॰ ऐं संहारभैरवश्री॰ इ
तितृतीयावरणम् ३ ततः षट्कोणे ॐ ह्रां
ह्रीं कालाग्निरुद्रश्रीपादुकांपूजयामितर्प॰

महा.
पू.
१२

यामि नमः ऐं नैरृतेशश्री· ऐं ईश्वरश्री· ऐं महेश्व
रश्री· ऐं सद्योजातश्री· ऐं वामदेवश्री· इति द
क्षिणावर्तेन चतुर्थावरणम् ४ ततो त्रिको
णे ॐ ह्रां ह्रीं कामेश्वरश्री पादुकां पूजयामि त
र्पयामि नमः ईशाने ॐ ऐं महाकालभैरव
श्री· ऐं स्वच्छंदभैरवश्री· अग्ने इति पंचमावर
णम् ५ ततो बिन्दौ ॐ ह्रां ह्रीं श्री मच्छ्रीज्वालाभै
रवीसमन्वित श्री महादेवश्री पादुकां पूजया
मि तर्पयामि नम इति विशेषार्घोदकेन संप्र
अस्त्रतर्पणं नैवेद्य ऐं कपालश्री· ऐं शूलेशश्री· इ
ति गंधादिभिः सम्यक्पूज्य षष्ठावरणम् ६ ॐ जग
हुति मंत्र मातः स्वाहेति च होमं संपूज्य ध्यानादि
कादि सर्वं यथाशक्ति जपं विधाय जपं

तेशुस्येतिजपंदेवायसमर्प्ययोनिमुद्रा
याप्रणाम्यकवचसहस्रनामस्तवपाठंकु
र्यात् ॐह्रींश्रींवटुकायनमः यांयोगिनी
भ्योनमः क्षांक्षेत्रपालायनमः गंगणपतये
नमः इतिदत्त्वामात्रस्थापितंपात्रंचतत्रस्थंसे
ष्य ततोनिर्माल्यवासिनीनैवेद्यपात्रंशेष
संहृत्यस्वात्मानंतेजोमयंविभाव्यनैवेद्या
विभाज्ययथासर्वंनिवेदयेत् इतिपद्धतिः॥
व्या नागयपयमयीशिवे नवस्नेहात्प्रकाशिता
गोपनीयाप्रयत्नभिः महादेवस्यदेवस्यज्वा
लाख्यःशिवस्यते वर्णितापद्धतिर्गलाय
नेकोटिफलप्रदा इतिश्रीविश्वसारोद्धारेतं
त्रेज्वालामुखीरहस्येमहादेव्याजापद्धतिः।

महा
पं
११

13

क्रमवर्णनंनामपटलः ॥ ॥
ॐश्रीगुरवेनमः ॐश्रीभैरवः ॐइदानीं
नववक्ष्यामिकवचं [illegible]र्मवर्धनम् सर्वरक्षात
न्त्रमेतद्धर्म्याविजयप्रदनामकं सर्वानर्थौघशा
मनंसर्वरोगनिवर्हणम् सुर्वणांसर्वदं
ष्ट्राणांपापराशिविनाशनं मूलमंत्रमयं
दिव्यंमातृकार्णविभूषितं ज्ञानकंसर्वपापह
रंसर्वदुःखभयापहम् अस्यैवधारणाद्दे
विपाकशासनःप्रसदांवराः अग्निकारांजगन्मा
प्रवेलनिर्हृलिनाल्पराः किमर्थंवादेनसुङ्गः
कवचस्यास्यधारणात् अंशकेद्भोगानवि
लान्विविधान्परमाद्भुतान् ॐनेसाक्षप्रमामो
तिमहादेवस्यसंदृति विजयप्रदनाम्नोतिक

वस्य महेश्वर ऋषिर्भैरवस्यानुष्टुप्छंदो वं
षु विनियोगस्ततम् महादेवो देवता चरणो बवी
जं भवानीति नम् शक्तिर्कीलकं शत्रुदिक्षु तारे
कीलकमीरितं चतुर्वर्गस्य साध्यर्थे विनियो
ग इति स्मृतः अस्य श्रीविजयमदनास्त्रोम
हादेवकवचस्य भैरवऋषिः अनुष्टुप्छंदः
श्रीज्वालामुखीश्वरो महादेवो देवता ह्रां बी
जं ह्रीं शक्तिः ॐ कीलकं चतुर्वर्गसाध्यर्थे
पाठे धारणे वा विनियोगः ॐ ह्रां ह्रीं मे शिरः
पातु महादेवो जगत्पतिः ॐ ह्रीं गं च ललाटं मे
ललाटोज्वलपावकः ऐं ऐं ईं ईं पातु नेत्रे च
यो विधातृनेतृः ॐ ॐ कं कं श्रुती पातु ज्ञातिक
न्याय दानकः ह्रं ह्रं पं पं कपोलौ मे पातु नि

मृत्यु
१४

मं कपालभृत् ओं औं अं अः नासिकां मे पातु
नक्तमित्रप्रभः कं खं गं घं ङं पायान्मुखं
मुख्यो महादेवो चं छं जं झं ञं गलं पातु गरघा
ममलो मम टं ठं डं ढं णं स्कन्दगुरुर्मम स्कन्धे
स्कन्दवल्लभः तं थं दं धं नं भुजौ पातु भुजंगवा
लयो मम पं फं बं भं मं सदा व्याघ्रो वलोवलोवि
धातकः यं रं लं वं वज्रधरं ममाव्यात् त्रिपुरान्त
कः शं षं सं हं पातु हृत्कुंभजश्च मां हृत्तो मम
लेतः नाभिं पातु नित्यं मम देवो त्यकादितः
जं नं गं नं मं मे पातु लिंगं लिंगार्चितो विभुः
श्रुत्यान्मकटिं नित्यं कटिस्य त्रीपिकृत्तिकः
जं गं नं चन्द्रेन्द्रस्फारी रोद्वारो ज्वलोरगः जा
नू मम व्यान्ममतं मदनान्तकमर्दनः जंघे

गंगेशोवविलसन्मूर्धो मम सदावतु गुल्फा
वनस्थैरा भागेणा मम मा आत्त्रमथ्यापिपः पा
दद्वयं द्वयानीनो रत्तनान्मम शंकरः सक
लामरचून्दे यो मम माव्यात्सकलं वपुः पूर्वे
मां गिरिशः पातु शिवो मैया पातु निरूपाः दा
त्तिणे दत्तयज्ञाच्चा नैर्ऋते नेवतु मां मरुः पश्चि
मे मां पशुपतिरव्यादायोपिनाकधृत् उत्त
रेवतु मां भर्गोऽस्त्वेषा मां विल्लुपूजितः ऊर्ध्वे मा
पातु सर्वेतो व्यापकात्सर्वकृद्विभुः प्रभाते
भैरवः पातु मध्याह्ने मामुमापतिः सायंम
साह्ने तां गोब्रामि घीथे वामदेवकः सर्वत्र
सर्वदा पातु मां महादेव ईश्वरः रणे घूने रा
जकुले विवादे रिपुसंकटे ज्वरे घोरे चतुर्भि

महा
पं
१५

तेषामभावेभरव्ययः इतिश्रीकवचंदिव्यं
विजयप्रदनामकम् महादेवस्यदेवस्यमू
लमंत्रमयंपरम् मातृकांकितंसर्वपा
पघ्नापनाशनम् गुह्यंयशस्करनृपव
र्धनंसन्मवोरिणम् स्वयंवारेविलिख्येतनि
स्तैर्जन्मभेयवा श्रमूंयेनदेवेशिकवचे
भास्करीदिने श्वेतसूत्रेणावावेष्ट्यस्वर्णमध्ये
निवेश्यच धारयेन्मूर्ध्निवावाह्वोपठेद्वानंदि
तःसदा विघ्नंजयेद्रणेदेविवादिनःपरिषत्स्व
पि भवेत्स्पष्टीयनेमान्योतिमंत्रेजामयोभवे
त् वहुनात्रकिमुक्तेनयद्यन्दनसिवांछितम्
तत्सर्वंप्राप्नुयादस्यधारणात्पाठतोथवा
महार्तिशायायाब्रह्मण्याययःपठेद्भक्तिभावितः

सर्पस्तस्य महादेवो वरदो भवति स्वयं ॥
इति श्रीविश्वसारोद्धारे तंत्रे ज्वालामुखीर
हस्ये महादेवकवचाख्यानं नाम पटलः
ॐ श्रीगुरवे नमः श्रीभैरवः देवदेवि न
वानेन मन्त्राकर्णेन हर्षितः सहंनेनन
किंचिन्मे गोप्यं त्वत्तः सुरेश्वरि वक्ष्याम्यह
नवश्रीश्रैनाश्रांसाहृत्वसत्तमे महादेवस्य
देवस्य ज्वालामुख्याः शिवस्य च पञ्चरत्न
मे देवि सारभूतं मयोदितं सर्वदारिद्र्यशा
मनं यशोलक्ष्मीविवर्धनं ज्वरादिरोगशा
मनं शत्राद्रुस्यनंसमहत् राज्यमानधना
रोग्यवैभवार्जनकारणम् आयुष्करं तुष्टि
करं सर्वदेवसुदुर्लभं प्रदातव्यं मम भक्तस्यो

महा
पं
१६
16

भक्तेभ्यो हितकारकम् श्रुतवत्यावहितोस्मि
त्वां मंत्रनामसहस्रकं ऋषिरस्य महादेवि
भैरवः परिकीर्तितः अनुष्टुप्छंदश्चास्य मा
हादेवश्च देवता शिवो बीजं पराशक्तिः प्र
णवः कीलकं स्मृतं चतुर्वर्गस्य प्राप्त्यै वि
नियोगः प्रकीर्तितः अस्य श्रीमहादेव मंत्र
नाम सहस्रस्य भैरव ऋषिः अनुष्टुप्छंदः म
हादेवो देवता गं बीजं ह्रीं शक्तिः ॐ कीला
कं चतुर्वर्गप्राप्त्यर्थे पाठे विनियोगः ॐ ह्रीं गं
हैं महादेवो महेशानो महोन्मनः महदो
चित्स्य महिमा महात्मा मोहनाशनः भक्ति
प्रियो भक्तिगम्यो भक्तलोकाभयंकरः वीरे
वरप्रदो वीरवंद्यो वीरयोगिकोवरः वीरपाला

लसोवीर्योद्भुतोद्भुताचिंतोविभुः वशंकरो
वशीवश्योवशागामीवशातिगः तिग्मोति
ग्मोदितोनीतिर्निश्रुणोनीतिवर्धनः धाताम
माहितगतिर्विधाताविधिभावितः लोकश
स्त्रभुर्वीशामोदाताविहितमंगलः शंकरः
सुमनाः शंतमः कमलासनपूजितः ग्रार्तिहा
कार्तिकेयाख्योदारिसूज्योदारिप्रियः दांतश्च
दंमनोदंभवर्जितोविजितामरः कालपो
लियतनात्माचकामदःकर्कशाकृतिः कालपा
शाकृतकलावेत्ताकालिहंताकलानिधिः व्योम
चारीवियद्व्यापीशंभुःशंभुम्मदव्ययः पंचमः
पंचमीकांतःपंचमस्वरमोदितः सामगःस
मरकौशस्यःसामस्यत्समरप्रियः दैन्यहादीन

मृहा
ॐ
१७

17

वेदस्य महानादो महोमयः निष्कलो रुण्डधा
री च रुण्डमालाविभूषणः मंडितांगो महा
लेषो मस्तकोपविराजगः रक्तालो रक्तमा
ल्यश्च रक्तालेपादिमंडनः सहस्रपात्सहस्रा
क्षो विजयेशो जयप्रदः ओंउम्भक्तोंसवासा
श्रङ्कलश्श्रेष्ठः ज्ञलप्रियः ज्ञानाग्रयपराज्ञेती
सूत्रवर्गेश्वरजितः ज्वालामाली श्वरो ज्वाल।
भीषणो जटिलो जटी जन्मातीतो जगद्भर्ता
जगद्वासी जगत्पतिः विरोचनो विशालाक्षो
विरूपाक्षो विशांपतिः विश्वात्मा विश्वकृद्धि
श्वंयो विश्वाश्रयो वशः विनायको विभाव
सुनत्रि मान्यातिमानदः श्रुताश्रयो श्रुताध्य
तो गणगंधर्वसेवितः गंगाधरो गणेशानो।

गिरीशो गिरिजाकान्तिः सर्वप्रियः सर्वगा-
तिः सदसत्पतिरक्षरः गीर्पतिर्गिरिवासी-
च सर्वसंश्रयः सतीपथः मोक्षदो मोक्षमार्गस्थो
सुखानन्दविवर्धनः सुन्दरो मूर्तिमान्मूर्तो मू-
र्तामूर्तो गतिमन्त्रः ध्यानदो ध्यानदो ध्यापील
वात्मानादिरूपकः तत्त्वरूपः समाधीनो वी-
तः सोमात्तमाश्रयः नताशापतिर्वार्धवः स-
गिकाशमवान्तमी सूक्ष्मस्थूलकाद्रूपादि
नम्रूपादिनेश्वरः पत्नो माससत्तर्वर्षोत्यने
शुभवक्त्रः शिवः शान्तो महात्मा परमकलिः
कलत्रघनाशनः शाकिनिश्चवनेशानो देवा
मन्वन्तरात्मकः अनन्तोऽनन्तमाहात्म्यो गार
शुभ्रगौरविग्रहः परमेष्ठी सृष्टिकर्ता जगद्गु

महा
पं
२८

18

नोजनार्दनः शाकोग्निर्देउमरुद्रलोवकणोवा
श्रवान्तरः गुह्यकेशः पशुपतिर्दुहिताश्वर
लाश्रयः कालाग्निनेत्रःकालात्मानकलनःका
लसूदनः पंचकृत्यकरो देवदेवः प्रथमनाय
कः वाक्पतिर्वाक्प्रदो वाग्मी वेदशास्त्रविदां
वरः मंत्रप्रयोजको मंत्री मंत्रिको मंत्रमंत्रित :
धान्वंतरिर्वैद्यवरो भैषज्यकृद्दत्तमः सो
ख्यवित्कपिलस्तर्कविद्याविद्दृष्टपारगः मी
मांसाज्ञो जैमिनिश्च पाणिनिः शाब्दपारगः
ज्ञोलाचारप्रियःकौलकुलीनाकुलकामदः
प्रस्कंदरमः स्कंदपिता संत्रसुः सनकनोदिनः
नीरोगो रोगहृद्योगिप्रसादः साधुसेवितः
पंचरवःपद्मायुक्तोदक्षमहापयःश्वनीलकः म

कराकस्थपरुर्वर्धः ऊंदेतिनियिवसूरविः वेदः
ऊर्जोरोहिणेयोजीवः काव्योर्यमात्मजः सैंहि
केयः शिखिकेतुर्भोड्ढवउत्तानपादजः वैराग्य
दीपतलालोरत्नकेंभपरीयरः स्वरवेदांतः
स्थितानामवेधोयज्ञरूपासितः संतानको
मंदरोथमंदारः कल्पपादपः माल्यवान्यो
दमः सतोमेरुश्चगंधमादनः हिमाचलः
यात्रकैलासोलोकालोकोलसन्नकः विभूति
श्चनसर्वांगोभूतमान्भूतिदोभवः भवश्चा
भीतिप्रद्मीमोभीमसालोभयानकः वस
तोदर्पकसखोनिदाघोदाहकारवः प्राबृ
डुपेन्द्रकम्बुग्रीवमकरनामानिदरोदरः प्रारब्ध
मिश्चसर्वानन्दशिशिरकाश्रिदीनयः हेमंता

महा
पं
११

हैमदो हैमगो हैमवतीप्रियः शिवाशिवः शा
रण्यकीर्तिर्गात्रनंदीनिषेवितः हृषीकेशोवृष
वाहस्थवृषभध्वजोवनाश्रयः विश्वैश्रवणा
राध्योविश्वदेवार्चितोवसुः वसुश्रेष्ठोवसुप्र
दोवसुदोवसुदाश्रयः सनंदोनंदनावासो
नंदकोकोनकाश्रयः साधुःसाधुप्रियःसि
द्धःसत्यपियप्रियवल्लभः तपस्वीतापसस्ता
पत्रयचक्रलयनोतपः तपस्यारगतिर्लोम
याज्ञोयज्ञफलप्रदः यज्ञसूत्रयाज्ञकश्रेष्ठो
यज्ञमानेष्टदोयतिः विश्वंभरोवंद्यपदोव
नवासीवनेचरः महाराजोराजभूषोराज्य
दोराजवल्लभः सनातनोध्रुवहृदयस्थोवृद्धि
दोविबुधोत्तमः प्रजापतिस्थलपरः कपा

लीकंठकंधरः अनंगमर्दनः स्वंगोजनराज
द्लसंस्थितः जीवनोजीवदोजीवोजगज्जी
वनतत्परः न्यायमार्गप्रदर्शीचसत्यात्मल
परात्परः पद्मासनरतिर्लक्ष्मीप्रदोत्तगुण
नन्दरः सर्वाम्नायप्रभुः प्रीतःश्वेतालयकृ
तस्थितिः श्वेतासनगनेतागम्यपदोपदवि
भूषितः त्रिकोणानिलयश्चक्रनायकोनय
कोविदः जपायपोजपश्रीतोजप्योजपपा
लप्रदः शिवःशक्तिमयःशाक्तःसदाशिव
लयेश्वरः शुद्धविद्यामयोमायावर्जितोमे
यवैभवः विद्यावेद्यःकालरूपःकलावलि
नकोकलः रागवाग्नियतिर्नैनाशुकरवःशु
कृष्णानामः ग्राणार्हतोग्रणामयःपञ्चनामहृत

मृह्वा.
प.
२.

90

कोधनी मनोतीतो मनस्वीच मानसालयः
विष्टरः महत्तत्त्वं महातेजा महिमाक्रान्तवि
ष्टपः अहंवादी विमत्सरोहंकारसंवृतस्म
रः षाङ्गः षाङ्गुणी शार्वः षाङ्विद्याविशार
दः सहस्रशीर्षा सहस्रपगतिः सर्वशोवाल्विगत
स्पृहः कृपीतिविमर्दीच परिह्लास्वरूपर
कः रसाञ्चलो रसञ्चलो रसिकोरसविभ्रमः र
सलोगन्धवल्कीर्तिः स्वगंधोवंध्यकल्पनः क्ष
तिः क्षान्तिमतीतोय क्षान्तिस्तयः क्षान्तिप्रियः
सगिन्द्रियस्वरवस्तनः कृतिनिवासादिगंबरः
लोचनत्रयरूपो नानादर्शनमध्यगः भ
सिद्धाग्रवर्तीजवनो ज्ञालागोह्लालामान्हली
वागीश्वरो वाक्यवक्ता वाच्यवाचकव्यापकः

पाशिगःपाशाकृष्टलोपोबन्धवर्तीवनाश्रयः
पयस्त्वन्यःपादचारीपदविन्यस्तदास्पदः
पाशुमाशुहरोनाशुःस्याशुकःस्थपतिःपतिः
उपस्थस्थःस्थिरमतिःस्थायीस्थविरसेवितः
हृष्टःपार्थार्चितःहृष्टीपतिहृत्स्थाःप्रयातिगः
जलवासीजलासंगवर्जितोजलदोज्वलःजा
लन्धरासनोजालरुद्धमाजंभारिभूजितः मे
नोतिर्पिंगनेनसीतेजितानाह्वाजितेन्द्रियः वा
तूलवल्लभोवानगतिकन्नवल्लभः प्रका
शवद्रुकाशगामीकलशामृतद्रुः सृंद्र
जयोमृतेशानोमृतदोमृतभंजनः इत्थो
पतिर्ईगंगतिर्दुर्गतिर्नाशरतामदः दारिद्र्य
मनोयीरोदयालद्वंद्वचातकः प्रजापवाः

संधिग्र्लोमानिर्ममोनिरवग्रहः इदं योभूत
भव्यद्भूतस्वामीभूतात्मकोभवः द्विभुजोसृष्ट
जोभर्गः दक्षाध्वराभञ्जः साक्षी सर्वज्ञः सर्वा
त्मकं सर्वात्माधारधामदः कारणोयोनि
कारणः सर्वकारणकारणम् अध्यात्माध्या
त्मविदेनानुरहस्यानुवल्लभः ब्रह्मसूनोब्रह्म
सूनोभूरथोभूरिदोभवः ग्रहिचापसायधरः
पिनाकीनापिसंस्तुतः चंद्रार्कवरुणजस्य
सकनायकउद्भवः अश्रुनेत्रभीषणास्याव
द्विदेवद्विसंस्थितः मरालवाहनोमारहः
मासरतिसूदनः त्रिधामनयनोनेतानय
विनयदायकः मत्स्यमूर्तिमत्स्यरक्षोनको
वक्रगतिर्गर्भकः वराहवपुषत्क्ष्मोवराहव

शुरो रामः नृसिंहः सिंहनादो घोरदर्पसोयपता।
हूजिनः वामनो वामवर्णज्ञो वामो वामप्रियः
परः रामो मातृपितृच्छेदी सवाहुर्वाहुजान्तः
कृत् राघवो लक्ष्मणासेव्यो रावणारिर्निरीन
मः सीतापतिः कपिसखो सुखदो दंडकाटनः
कृष्णो कृष्णरतिः कृष्णावंशुः सखीभवापहः
माधवो मधुदर्पघ्नो बलभद्रो बलान्वितः स
त्यभामापतिः सत्यरतिः सत्यपराक्रमः हूल्ला
वनालयो नंदनंदनो रुक्मिणीप्रियः वासुदे
वो वसुदेयो वासवेयो वत्सविनकः बुद्धो जिन
सुतो जैन शास्त्रविकरणापरः कल्की कल्क
रो दारी म्लेच्छहा कलुषापहृतिः मल्लो मल
यो माली स्फुराकारः खटीश्वरः परंज्योतिष

महा
पं
२२

रंखर्वपीवरांसःपराश्रितः प्रणतार्तिहरोहरी
रमंडितांगोमहांगकः हर्षानंदमयोमेधो
मेधावीमदशालितः पीतांबरांबरधरश्चराच
रचरेश्वरः भगोभागीरथीसेव्योमानदोमा
नवाकृतिः मेदिनीयोमहाक्रांतोमनुर्मनुह्र
दनगः भूर्जैर्जैयोजयोजंगालोजंघ्योवैभ
वः नर्मप्रियोवमंथरोमारकांतरवेशितः
षडाननःषड्गमपःषड्दर्शनप्रवर्तकः यज्ञो
यरोयाज्ञग्यशायज्ञायोगिजनार्चितः स्थाणुः
स्थंडिलशायीचस्थूलमूर्तिःस्थलातिगः नाक
नानगरातिःस्वर्णपलोवज्रसदः नासक्र
नरनाराध्योनटवेषोधृजेसकार कलावानो
यविज्ञेयगम्योवायपतिर्वदः ग्रामीशांनाह्न

तिः कामी कामदः काममर्दनः सर्वाचारोनि
राचारो मांसाशी विश्वमेखलः सुवासियोमेरा
कामामोदकाहारतोषिनः सुचीरभैरवोघो
रोद्वासिर्भुर्भुवगर्जनः सत्वरूपः पीनबाहु
दीर्घवृत्तः त्रमात्मकः चन्द्रमूर्तिश्चन्द्रवोत्तम्बे
चलश्चिश्चिनीपतिः सनातनः समानश्च सप्ता
नासमनास्तमः शुभमूर्तिः प्राचीनोथः पात
यत्नः स्वरोत्तमः वैश्वानरो विश्वगुरुः स्वाहार
व्यः स्वधाचितः धर्मराजः परीनेपीयग्रना
मोदरोदरः नित्नीरातलश्चेशोलपंश्वतिक
षात्मकः वरुणास्तरुणाकारोयादसांपतिर
पांपतिः श्वसनोमृगवाहस्थोदुर्गगामीश्र
नागमः कुवेरोवीरजिद्दीर्योधिकर्बिशुकरे

महा
पं
२२

23

स्वरः ईशानः सकलश्रेष्ठः प्रपौर्वतीशस्त्रिष्टविग्रहः
विधिः श्रुतीनिधिः पद्मासनो पञ्चवक्त्राननः स
हस्रशीर्षो घोषाढ्यो भूमंडलधरो धरः मन्त्रवे
षणो मतवाप्तलः शंकानाशोप्यनश्वरः यज्ञाग्नी
कीरवाक्शीलो सारस्वमेधामंडितः श्रुतिजो
जितदैतेयो देवसंघप्रियंकरः त्रिविष्टनाथोति
थिवैवश्रतिपत्सर्वदैवतम् अहिनीयोऽद्वयो
न्मृकस्तनीयालिंगितोदरिः चतुर्थीवश्यक
त्यर्थस्वर्यातीतो विरोचनः त्रिपंचनयनः पंच
मुद्रापंचपादर्दनः षट्कलो मन्त्रराजः षडं
गमस्तमंत्रकः सप्तस्वरपरः सप्तमनुतिः सेव्यः
सर्ववासिनः अष्टसिद्धिप्रदोऽष्टमूर्तिरष्टांगा
योगवित् नवरत्नासनासीनो नवधानवनतो

ष्ठितः दशबाहुर्दशास्त्रो दशशाखो दशाननो
ज्वलः रुद्रो रुद्रवपुः शुभ्रः शिवघनो नार्थवर्धनः
द्वादशात्मा दिनकरो द्वादशादशो विभावसुः
त्रयोदशी त्रितनयरोदासमन्निर्विवराहहा वीभ
त्सवरदो वीरचर्विनो सुहृदर्मदः चतुर्दशो
गविद्याविश्वन्दशामनोद्भवः दशीहूपःसी
ताकलाकलशीभूत्पञ्चपार्थिवः सर्वात्माप
र्वदोदांतोविभाट्नकमच्छविः वर्णोत्सरोव
लीमालीधेनुकांत्कोमोपमः वेत्सवैतालिक
संगीतोवीणावादननरः कोमलाकोप
वान्कोलत्सीवाल्लरसणोमतः खेचरःखे
चरीश्वरायोरापाश्रियःस्वराः ऊज्ञोलाने
नवारवादोसंजादारोपदाशायः स्वदेस्वना

१ मूहा
प
२४

स्थितोहार्दमयोगर्भगतोगतः नृग्रालंकृ
तपदोनरवाहनकामदः सत्वाधिकोरजो
तीतस्तमस्यारोग्यगातिगः विकर्त्ताकर्त्तरी
नाथोलक्ष्मीनारायणार्चितः भूतात्मापरमा
त्माचजीवात्माजीवजीवनः ग्रन्थिनीसूत्ररथा
योग्यमस्तदानतत्परः भवतोभवतांसंस्था
भक्तसंभरणात्मकः कृतकृत्यः कृतप्रीतिः कु
लिकाश्यपत्रात्मभूः रोहिणीरमणोरोहारोह
णाचलसंस्थितः मृगश्रयोमृगाधिहीनोमृग
पुनर्वसुनक्षत्र शीर्षाकृतिःसती रयार्द्राहृदयोपार्द्राश्रयो
रोथन्योभन्त्र द्रमतलास्थितः + पुष्यःपुष्यप्रियकरःपुष्यकालहा
जनाश्रयः सर्वमंगलः श्लेषोश्लेषणतत्वंतत्त्वजिज्ञा
जिज्ञभः मघालंकृतकोमाघकमामघवर

स्विनः कालकालः कलशः कामदेवः कलशहः
हल्लाहर्षोनः हस्तोहस्तश्चविग्विषोहस्तिवक्त्र
विवेश्वरमन् विश्वकर्मा वविश्वसंभवः वैविश्वा
भावनः स्वातिसमारंनोमानी सानदोदवसे
स्विनः विश्वात्ववद्भो विद्योविश्वाद्योवश
हर्षः श्रवणाश्रयोराश्योश्रुणपश्रुतिप्रदे
सकः सेवोजविदोज्ञे सेप्यो स्थूलं सीलहिलो
चनः श्रष्टादहसोप्याद्याहजनपनोनत्यनाव
हः श्रवणांज्ञतिविक्रमोधानिष्पतिहमर्दनः
भैषज्यकृत्कृत्तभिषक्कृतनेत्रीप्रवाहकः भ
रपदोमाद्दपदोरेवतीभोगारिवेचकः किंकि
णीशास्त्रसंतेप्सोवेशीवादत्तनयपः भीमो
भ्रमदरोभीमांवल्लभोनित्यदर्शनः सौलि

मृ.स.
पं
२५

मार्यौलिभर्त्योयपंचब्रह्मायवीलसन् नक्षा
कल्पवरोवीथोवेयमूर्तिर्वेराकृतिः मधुरा
योमाली कोहीलावण्यमरिनाकृतिः लव
णाश्रियउद्दामदमनोदम्याकीउकः कटुभोजी
कटोत्सवस्तुबिनोवड्डकालमकः तिमोव्यका
मरोवृक्षंतिमाखादीविकर्षनः ग्रस्ताविया
मृत्मयरोग्रव्लालोप्रमलधुतिः स्वात्रुरूपोव
रगातिर्गतिमानसर्वसारभूतन् पंचनादमयो
विदुरूपोनादालगोमहान् प्रमाणातीत
संविकः प्रत्यक्षांतगोचरः संतान्कारिश
मानीनो आमिसांलिंगमघोकः ग्रानिदेश
परोदेवोदेवधिकोमार्गदर्शकः ग्रामश्रुति
रागमस्तोऽदैयोसानवर्धनः ग्राम्यद्वा

न्नसिद्धांतः षोडशार्थविचक्षणः समार्थ
विज्ञायवाशीकणाभक्तोक्तपादकः वैशेषि
कोवैकृतिकोविकृतिस्थः कृपापरः कृपा
णाम्न्कन्दरूपः कारणंकार्यरूपकः श्रुयैस
कस्यचित्त्रुटीमयश्चित्तिस्थस्कन्कालः १०००
इति नाम्नां सहस्रं तु सारं शास्त्राम्बुधेः परम्
महादेवस्य देवस्य कथितं तव भामिनि त्व
त्स्नेहेन मयेमास्ताश्चिन्तामणिनिभं शुभे
श्रवणेन भक्त्यन्कथैतानवशेष्कं मया न चे स
र्वयज्ञफलोद्दिष्टेतिकृतसंपद्दिवर्धनं सङ्कृ
रुद्धनमाशेषात्मनोपास्यप्रभावनः येयः
कामसमभिध्यायेत्तंतश्नामानिनिश्चितं यः
श्रावयेद्वापि नरान्भक्तिपारायणास्तनः सर्वी

महा
पं
५९

रः सकलाभोगान्संक्षेपेण च यथोक्तिनान् परत्र
नाकेश्वजनितस्वर्वेषणाजननेनोषितः रवौ देवि
लिखित्वा नक्षीरपत्रे सुधौमने गुप्तमंयेना
देवविलेखत्वमामालनीभूवा स्थलमंबम
त्रस्वस्पत्रदौसंवेष्टयेतनतः कस्याकातिनः
स्ववेतानतस्वतौनिवेशायेत् धारयेत्सुधि
वाराहेशुद्धाभक्तिसमन्वितः किंकिंनसा
धयेद्देवि यत्समापिदुर्लभम् नानारोग
धरोगनैश्चरीयारुणमात्रतः सर्वो देवि भ
वेद्दिव्यवपुःश्रीमान्दोषमः वेष्यालभेत्स
तंकांतंकाकवंध्यापियावेति रत्तौगच्छेत्तु
तीर्थस्नानसमत्वेवमहेश्वरम् यापिवाक्रममा
लङ्केशजित्वाविजयवान्भवेत् यथाहस्तयवनै

नश्यन्ति तस्मात्कुमारजनः नाम्नां सहस्रस्यैतस्य
लभते नात्र संशयः अप्रकाश्यमदातव्यम
वक्तव्यं दुरात्मने शान्ताय भक्तियुक्ताय देव
गुरुपरायणाय इति ते देवदेवेशि प्रोक्तं नाम्नां
सहस्रकम् महादेवस्य सततं गोपनीयं प्र
यत्नतः ॥ इति श्रीविश्वसारोद्धारे तन्त्रे ज्वाला
मुखीरहस्ये श्रीमहादेवसहस्रनामप्रका
शने नाम पटलः ॥ ॥ ॥ ॥ ॥
श्रीभैरवः अथाहं संप्रवक्ष्यामि स्तोत्रं तत्त्वनि
रूपणम् पंचमांगमयं देवि सर्वापद्विनि
वारणम् सिद्ध्यष्टकप्रदं साक्षात्कलावीप्सित
दायकं सर्वागमरहस्यानां तत्त्वं संपत्तिवर्धन
म सर्वतंत्रौघसर्वस्वं महादेवप्रियं परमु

मृ.स्त
प
२७

27

क्षिप्रं क्षिप्रं दं लोके साहसपालीम् उत्तमम्॥ अ
स्य स्तोत्रस्य देवीपिशाच ऋषिर्भैरव ईरितः अनुष्टु
प्छंद आख्यातं महादेवस्य देवता मायाबीजं
शिवः शक्तिर्ध्यौं कीलकमीरितं भोगापव
र्गसिद्ध्यर्थे विनियोगः प्रकीर्तितः॥ अस्य श्रीम
हादेवस्तोत्रमंत्रस्य श्रीभैरवऋषिः अनुष्टुप्छं
दः महादेवो देवता ह्रीं बीजं गं ह्रां कील शक्तिः
के भोगापवर्गसिद्ध्यर्थे पाठे विनियोगः ओं
तारं तारकताय कामलमलेयोनः स्मरेत्सा
न्तं पाथोधिभैवनाय श्यामयमयसंमार
कोत्थावकं योभोवत्स्मन्त्रराजमौलिगमया
प्रथस्तेनित्ययाः प्राणानांविरमेतिनिर्हेति
मंयत्वद्रूयमाप्नोतिसः १ मायांमायानायभे

दोग्ध्रंसंसीत्वन्मंत्रोनः संजपेद्योवधानात् हि
त्वालौलं पार्वनैसर्गिकैतन्हृदेलत्मीः स्वस्थि
रासंवसेव २ शिवबीजं शिववर्धनं जपेद्यः
स्तवमंत्रोभिनमस्यत्रूलिंस्थुनः प्रसरेत्नस्यव
गाघमाघसन्नास्तवतोनर्लमेवदेववाणी ३
मध्यं... नव मनोर्धदिक्षरेनामडंत्लमावि
लार्थसाधकम् नेस्मरातिविभुराकिलोवी
चीविश्वैर्भजतितेोघपोघकैः ४ मंत्रघोत्क्ष
वयदिजपेद्धाहवंसाधकेंद्रो वलेद्दादिविद
घाघरिघन्सेविनेभक्तिपूर्वम् भुक्त्वाभोगानि
हवह्रविधान्तुलंभान्देवलोकैर्दूरस्यान्ते वजं
तिपदवीयोगिसंघानत्वलाम् ५ [illegible]
वदेवाधिलोकराजनकस्तवनमम् गोविंदसूत्र...

महा
पं
२८

मंत्रानांवांछितार्थप्रदंपरम् प्रदातव्यमभ
क्तायपाषंडायदुरात्मने व्रतसंस्कारहीना
यशठरूपायलोभबहुलिने भक्तियुक्तायदातव्य
मचपलमचलात्मने इतितेचार्यसर्वस्वंपंचां
गमखिलंप्रिये नवश्लेमात्रपाठेनमहादेव
स्यकीर्तिते यस्यकस्यनवाप्रियेदुर्लभंसर्व
सिद्धिदम् ॥ ॥ इतिश्रीविश्वसारोद्धारेतं
त्रेज्वालाभैरवीरहस्येमहादेवस्तवाख्यानं
नामपटलः ॥ समाप्तश्चेदंमहादेवपंचांग
समाप्तम् ॥ शुभमस्तुसर्वजगताम् ॐश्री



महादेवं
पोथितरा॥